॥ श्रीरामः शरणम् ॥

प्रतिगुरुवासरं
प्रकाश्यते

सम्पादकः
डा. कृष्णप्रसादः जि.

आदिशिला

साप्ताहिकी आदिशिलापत्रिका

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते ।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति ॥

प्रथमखण्डस्य | श्री विश्वावसु संवत्सर माघ फाल्गुन २०२६ | प्रथमसङ्ख्या

प्राचीनलेखमञ्जूषा-०१

सत्तमा सहधर्मिणी

रचयिता - वाणीभूषणम् श्रीओङ्कारप्रसादः
मैंहगरवाल, होश्यारपुर १४४२१८ (पञ्जाब)

केकि-केका-कूजिताखिल-ककुप्-कुले, गुग्गुलु-काकेन्दु-भल्लातकी-तापस-तरु-जम्बीरादि-द्रुम-सन्दोह-सुशोभितमेदिनी-नितम्बे, प्रचुर-प्रकार-पर्णशाला-परम्परा-परिस्तृत-प्रदेशप्राये, सर्वत्र सङ्कीर्ण-विशिखा-वर्त्म-सन्नवाये दक्षिण-भारतस्य क्षोदिष्ठे ग्रामे, एकस्यानल्पीयस्यां प्रकोष्ठिकायां रात्रावेरण्ड-तैल-दीप आलोकं व्यतरत् ।

तत्र मृन्मयमङ्गनं, मृन्मय्यो भित्तयश्च गोर्वरोपलिप्ताः सितया मृत्स्नया च संस्कृता राजतीं विभां बिभराम्बभूवुः । प्रकोष्ठिकायाश्चैकस्मिन् कोणे कियन्मात्रा मृत्तिका, अपरस्मिंश्च कोणे जलपूर्णो मृत्कलशोऽशोभत । इतरस्मिन् कोणे चैका पेषणी, मृन्मयानि पात्राणि, स्वल्पीयसी चेका खट्वाऽवर्तत ।

प्रदीप-सन्निधौ कुशासने प्रधीप्रवर एकः पण्डितोऽवर्तिष्ठ । नातिदूरे च तस्य मृन्मयं मसीपात्रमभूत् । लेखनीहस्तश्चासौ तन्मयेन मनसा लिलेख ।

अन्तराऽन्तराऽसौ समीप-स्थितानां ग्रन्थानां पृष्ठानि पर्यवर्तयदपठच्च । पुनः पत्राणि तथैव संस्थाप्य मुद्रितनेत्रश्चिरं किञ्चिच्चिन्तयाञ्चकार, पुनरक्षिणी चोन्मील्यालिखत् ।

एतस्मिन्नेवान्तरे मन्दप्रकाशः क्षीणस्नेहो दीपः प्रौढयैकया महिलया तैल-पूर्णो विहितः, परं दग्धं वर्तिकाग्रं लुनन्त्यामेव तस्यां दीपो निर्वाणतामगमत् ।

लिखतः पण्डितप्रवरस्य पाणिः सहसाऽन्धतमसि(?) रुद्धः । पुनः प्रदीपं प्रज्वाल्य प्रयान्तीं योषितं योषान्तामन्तर्वाणिर्ददर्श ।

आश्चर्य-चकितश्च सादरं पप्रच्छ— "देवि! भवती का?"

सा सविनयमवदत्– "भवानिदानीमविघ्नं स्वकार्यं सम्पादयतु। निर्वाणो दीपको भवत्-कर्मण्यन्तरायकरो जातोऽतः सागसेयं क्षमां याचते।" इत्यभिधाय यदा सा पुनर्गन्तुं प्रवृत्ता, तदा पण्डितप्रवरः प्रोवाच– "भामति! भामति! क्षणं तिष्ठ, शृणु मे वचनमिति"।

भामती प्राब्रवीत्– "नाथ! स्वकीयां जीवन-सहचरीं साधनां विहाय, कथमधुना भवान् मोहगर्ते पतति, मामपि च कथं पापपङ्के पातयति।"

पण्डितप्रवरः प्राह– भामति! नाहं त्वां पापपङ्के पातयितुकामः, अहन्तु आत्मनः कृते चिन्तयामि– "अप्यहं पापगह्वरे पतित उतोन्नतं शिखरमारूढः?"

भामती– "नाथ! देवो भवान् यत् किञ्चिल्लिखिष्यति, तेनैव जगद् उद्धरिष्यति।"

पण्डितोऽख्यात्– "भामति! सत्यं जानीहि भगवता व्यासेनानेकाब्दतपसोऽनन्तरं 'वेदान्तदर्शनम्' इत्याभिख्यो ग्रन्थोऽयं व्यरचि। मयापि च सकलजीवनमस्यैव पठनं मननञ्चाकारि, परं विश्वसिहि त्वं मदीयं सकलं पठनं मननं विवेकोऽखिलश्चायं वेदान्तः सर्वं पावितस्य सहजतपोमयस्य तव जीवनस्योपेक्षयाऽगण्यमस्ति। यतस्त्वन्तु साक्षाद् वेदान्तोऽसि" इति वदन्नेव पण्डितः पुनस्तच्चरणयोः पतितुमना अजायत।

भामती तमन्तरैवोत्थाप्य सविनयमवदत्– "पतिदेव ! किमिदमकार्यं क्रियते मुहुर्मुहुः। नाहं स्वजीवने भवत्-परिचर्यामन्तरा किमपि कामये। दयावता भवता मह्यं सेवावसरं वितरता महानेवायं मय्युपकारः कृतः। अद्यावधि प्रत्यहं भवच्चरणयोः ससुखमस्वपम्, एवमेवैतयोरेव चरणयोः सुप्ता यदाहं महानिद्रां लभेय तदैव मे सौभाग्यं भवेदिति।"

बुधोऽवोचत्– "भामतीदेवि! शृणु– मया स्वकीयं सर्वं जीवनमेषां पत्त्राणां लेखने एव यापितम्, परं त्वया मत्कृते यादृशं जीवनं जीवितं तत्तुलनायां मदीयं जीवनं क्षुद्रतमं गतार्थमेव च प्रतिभाति, यतोऽस्य ग्रन्थस्य एकैकस्मिन् पत्रे, एकैकस्यां पङ्क्तौ, एकैकस्मिन्नक्षरे च त्वदीयमेव जीवनं दृष्टिपथमायाति। अतो ग्रन्थोऽयं जगति तवैव नाम्ना ख्यातिं लभतामियमेव मे द्रढीयसी लालसेति।"

भामती अकथयत्– "प्रभो! तथा क्रियतां यथा भावत्केऽनुपमेये आत्मत्यागे मादृशीं क्षुद्रतमां मानवीमिमां जगदिदं सर्वथा विस्मरेत्।" इत्यभिधाय गन्तुं प्रवृत्तायां भामत्यां पण्डितप्रवरः प्राह– "इदानीं त्वं यत्र जिगमिषसि यथास्वं गच्छ। परं नाहमधुना सजीवं मूर्तिमन्तं वेदान्तं विहाय वेदान्तस्य निष्प्राणं शवमिमं स्प्रष्टुमिच्छामि।" इत्युक्त्वा बुधेन सर्वे ग्रन्थाः पत्राणि चाखिलानि वस्त्रैः पिहितानि विहितानीति।

विपश्चिद्-विरचितोऽयं महान् ग्रन्थो वेदान्तदर्शनस्याद्वितीयं भाष्यमद्यापि ब्रह्मसूत्रभाष्यस्यानुपमं रत्नं मन्यते।

अस्य ग्रन्थस्य नामास्ति "भामती", रचयिता चास्यास्ति– प्रख्यातः पण्डित-शिरोमणिः श्रीवाचस्पतिमिश्र इत्योम्।

